# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा** – आचार्य -२ (SEM-3) | **प्रश्नपत्रम् -३** (CC 5.3.8) | **गुणाः** – ७० |
| **विषयः**- स्वामिनारायणवेदान्तः(S) | | **ग्रन्थः**- भद्रेशस्वामिविरचित-स्वामिनारायणसिद्धान्तसुधा |
| **दिनाङ्कः** – ०६/१२/२०१८ | | **समयः** – १० तः १ |

## प्रथमान्वितिः

**प्रश्नः १ कस्यापि एकस्य व्याख्या कार्या ।** ०५

१ स्वामिनारायणेनैवं पदार्थाः पञ्चकीर्तिताः ।
यज्ज्ञानात् कृत्स्नतां याति ब्रह्मविद्याऽपवर्गदा ॥

२ अश्नोतेर्व्यापनार्थाद्धि नञ्पूर्वात्क्षरतेस्तथा ।
व्युत्पन्नोऽक्षरशब्दोऽयं ब्रह्मण्येव प्रयुज्यते ॥

**प्रश्नः २ एकं निबन्धात्मकोत्तरं लिखत ।** १०

१ यथापत्रं तत्त्वपञ्चकं चर्चयत ।

२ मुण्डकोक्ताऽक्षरब्रह्मपुरुषोत्तमशब्दाऽभिधेयत्वविमर्शः ।

## द्वितीयान्वितिः

**प्रश्नः ३ कस्यापि एकस्य व्याख्या कार्या ।** ०५

१ गुरुरक्षरब्रह्मैव दिव्यो दिव्यतनोर्धरः ।
नारायणस्वरूपं च सम्प्रदायाऽभिरक्षकः ॥

२ मनुष्याकारतस्तद्धि साकृतिकं भवेत् सदा ।
तस्य चतुःषु पार्श्वेषु नैकब्रह्माण्डसंस्थितिः ॥

**प्रश्नः ४ एकं निबन्धात्मकोत्तरं लिखत ।** १०

१ अक्षरस्य चतुःस्वरूपाणि ।

२ धामस्थसेवकरूपमक्षरं ब्रह्म ।

## तृतीयान्वितिः

**प्रश्नः ५ कस्यापि एकस्य व्याख्या कार्या ।** ०५

१ युगपन्निखिलं वेत्ति विना यत्नं सदा स्वतः ।
संकल्पे प्रथमं सृष्टं विश्वं तेनेति सर्वविद् ॥

२ अन्वितो नगनद्यादौ जीवेश्वराऽऽत्मसंस्थितः ।
प्रतिमासु विशेषश्च विभवेष्वपि तिष्ठति ॥

**प्रश्नः ६ एकं निबन्धात्मकोत्तरं लिखत ।** १०

१ परब्रह्मणः इच्छाक्रियाज्ञानशक्तिप्रदातृत्वम् ।

२ परब्रह्मणः परत्वम् ।

## चतुर्थान्वितिः

**प्रश्नः ७ कस्यापि एकस्य व्याख्या कार्या ।** ०५

१ आत्मा ज्ञानाऽविनाभावी ज्ञानमात्रविहिनताम् ।
न भजते यतो ह्यमनादिसंसृतिं गतः ॥

२ हेतुवृद्धि यदाभासो हेतवो दूषिता मताः ।
हेत्वाभासास्ततो ज्ञेया व्याप्त्यनुमितिरोधकाः ॥

**प्रश्नः ८ एकं निबन्धात्मकोत्तरं लिखत ।** १०

१ हेत्वाभासाः ।

२ शब्दप्रमाणपूर्वकं वेदविमर्शः ।

## पञ्चमान्वितिः

**प्रश्नः ९ दशानामतिलघूत्तराणि देयानि ।** १०

१ ब्रह्मद्वयोपदेशे पिप्पलादवाक्यं किम् ?
२ स्वामिनारायणसिद्धान्तः पत्ररूपेण केन विलिखितः ?
३ परब्रह्मकथिततत्त्वपञ्चकोक्तिं लिखत ।
४ सम्प्रदायोक्तप्रस्थानचतुष्टयनामानि कानि ?
५ ग्रन्थस्यैकं मङ्गलम् ?
६ ब्रह्मस्वरूपगुरुसमाश्रयणोक्तिः मुण्डकोक्ता लिख्यताम् ।
७ कठोपनिषदि अव्यक्तपदवाच्यं किम् ?
८ ब्रह्मपरब्रह्मसम्बन्धः कीदृशः ?
९ ऋताख्यफलस्य सहपानकर्तृता कयोः आत्मनोः ?
१० गीतायां परप्रकृतितया किमुपदिष्टम् ?
११ भगवत्पदाभिधेयत्वे प्रवृत्तिनिमित्तं किम् ?
१२ परमात्मनः एकत्वे एका वचनामृतोक्तिः लिख्यताम् ।
१३ वर्णाश्रमाः परब्रह्मनिर्मिता इति गीतोक्तिं लिखत ।
१४ परब्रह्मणः आनन्दप्रदत्वं कुत्र वर्णितम् ?
१५ षड्वेदाङ्गानि कानि ?

------xxxxxx------